# ॥ श्रीभवसोदर्यष्टकम् ॥

श्रीमत्परमहंसेत्यादि समस्तबिरुदालङ्कृत श्रीजगद्गुरु सार्वभौम शृङ्गगिरि श्री श्री सच्चिदानन्द शिवाभिनव नृसिंहभारती महास्वामिभिः अनुगृहीतम् ॥

भजतां कल्पलतिका
भवभीतिविभञ्जनी ।
भ्रमराभकचा भूयात्
भव्याय भवसोदरी ॥१ ॥

करनिर्जितपाथोजा
शरदभ्रनिभाम्बरा ।
वरदानरता भूयात्
भव्याय भवसोदरी ॥२ ॥

काम्या पयोजजनुषा
नम्या सुरवरैर्मुहुः ।
रम्याब्जवसतिर्भूयात्
भव्याय भवसोदरी ॥३ ॥

कृष्णादिसुरसंसेव्या
कृतान्तभयनाशिनी ।
कृपार्द्रहृदया भूयात्
भव्याय भवसोदरी ॥४ ॥

मेनकादिसमाराध्या
शौनकादिमुनिस्तुता ।
कनकाभतनुर्भूयात्
भव्याय भवसोदरी ॥५ ॥

वरदा पदनम्रेभ्यः
पारदा भववारिधेः ।
नीरदाभकचा भूयात्
भव्याय भवसोदरी ॥६ ॥

विनताघहरा शीघ्रम्
विनतातनयार्चिता ।
पीनतायुक्कुचा भूयात्

भव्याय भवसोदरी ॥७ ॥

वीणालसत्पाणिपद्मा
काणादमुखशास्त्रदा ।
एणाङ्कशिशुभृद्भूयात्
भव्याय भवसोदरी ॥८ ॥

अष्टकं भवसोदर्याः
कष्टनाशकरं द्रुतम् ।
इष्टदं संपठन् शीघ्रम्
अष्टसिद्धीरवाप्नुयात् ॥९ ॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]